प्रवेश सं० १८२१४ विषय: पुराणेतिहासम् क्रम सं०

नाम श्रवणद्वादशी माहात्म्यम् (भाद्रपदे श्रवणेन युता) ग्रन्थकार

पत्र सं० १-४

श्लोक सं० अक्षर सं० (पंक्ती) ३६ पंक्ति सं० (पृष्ठे) ११

आकार: ६.५" x ५" लिपि: दे० ना० आधार: का०

वि० विवरणम् पू०

14495

पी० एस० यू० पी०--७७ एम० सी० ई०--१९५१--५०,०००

नं० ३८२९

महेश्वरसंग्रहे - ३३५

# श्रवणद्वादशीव्रत
# कथाप्रारंभः॥४॥

Indira Gandhi National Centre for the Arts

श्रीगणेशाय नमः ऋषिरुवाच कूर्म्मरूपधरं देवधरणीधरमव्ययं सहस्रपात्सहस्रा
१ क्षं सहस्रशिरसं हरिं १ महर्षयो [illegible] ब्रह्मविदो नैमिषारण्यवासिनः प्रप्रच्छुरं
लिपुटाः कौतूहलसमन्विताः २ कथिता नित्वया देवव्रता निवहुधा किल सांप्रतं श्रो
तुमिच्छामो व्रतानामुत्तमं व्रतं ३ विजयाख्यं महाभाग समीहितफलप्रदं कृत्वा पा
पविहंतारं जन्मसु निकृंतनं ॥४॥ कृतेनयेन भगवन्सर्वकामफलं लभेत् नरस्ता
कं कस्मायाकथयस्व परं हितं ५ श्रीभगवानुवाच शृण्वंतु सर्व एवैते सावधाना
द्विजोत्तमाः तस्यां हंतं कृतेन सर्वलक्षगुणं भवेत् ६ अस्याप्रभावं वक्ष्यामि शृण
ध्वं द्विजपुंगवाः महोदयं नाम शुभं नगरं देवनिर्मितं ७ तत्र द्विजातिप्रवरो गभ
स्तिर्ब्राह्मणोवसत् देवद्विजरतो नित्यं हरिभक्तः सदाव्रती ८ अथाध्ययनशी
लश्च अग्निहोत्रक्रियारतैः तस्याधिवसतो गेहे ह्यागतो द्वादशी तिथिः ९ श्रवणे
न समायुक्ता मासि प्रोष्ठपदे सिता नियमस्थो भवेत्तस्यामुपवासक्रियारतः १० श्र १

घस्थित्वा निराहारः सर्वभोगविवर्जितः त्वत्प्रसादाद्विघ्नेन श्वोभोक्ष्ये हं जनार्दन ११
एवं संनियमं कृत्वा ब्राह्मणाः शंसितव्रताः भार्यापुत्रवधूशिष्यैः सहितो व्रतमाचरेत् १२
तस्मिन्नेव दिने प्राप्ते वणिक्पुत्रः समागतः स्वभारक्रोद्विज श्रेष्ठस्तृषापिपासासमन्वि
तः १३ प्रक्षाल्यपादौ वाचम्य संस्थितश्चासने वरे यावत्पश्यस सौतत्र न काचित्स्या
कसंस्थितिः १४ किमेतदिति मन्वानः पप्रच्छ द्विजसत्तमं भगवन् ब्रूहि तत्त्वेन कि
मेतद्वर्ततेधुना १५ गभस्तिरुवाच अद्यपुण्यदिने भद्र विजयाख्यं व भवह सर्वमेतन्म
मगेहे व्रतकार्यसमुद्यतो १६ कुटुंबं वर्तते पुत्र निराहारं परिस्थितं त्वमप्यद्य कुरुष्व
तिव्रतमेतत्सुशोभनं १७ सर्वपापहरं पुण्यं विस्मोक्षैककरं परं इत्यसंप्रतिबो
ध्यात्मगभस्तिस्तं वणिकूसुतं १८ संगमं प्रतिसंजायातेनैव सहितो द्विजाः कुंभ
मंतं वणिक्पुत्रं महाग्रामनिवासिनं १९ अधर्मिष्ठं जडं मूर्खं देवब्राह्मणनिंदकं सो

Indira Gandhi National
Centre for the Arts

२ विस्नातो वणिक्पुत्रो भ्रांतो विमनमानसः २० स्नात्वा देवगृहे रम्ये वैस्नवे स्वागतो द्वि
जः संभारान्प्रगृह्णीकृत्य व्रतार्थं सुमनोहरान् २१ ताम्रपात्रं व्रीहिपूर्णं च स्निग्धं कर
कं नवं तथा कृत्स्न तिलान्वि प्राव स्त्रयुग्मं मनोहरं २२ हाटकं वामनं रूपं संग्राह्य ग्राम
परिच्छदं॥ ब्राह्मण उवाच भगवन् विस्तरेणेदमस्माकं कथयाधुना लिखा कलिप्रमा
णास्तु किंपात्रपरिमाणकं कथं स वामनः कार्यो सर्वमेतद्ब्रवीहि नः २३ कूर्म उवाच
तिलाः पलशतं कार्याः पात्रं विंशतिसंख्यया पलानां कारयेद्विप्र वामनं च लसंख्यया
२४ सुवर्णस्य तदर्द्धेन यथा विभवविस्तरं कार्यं सर्वं द्विजश्रेष्ठ नात्र कार्या विचारणा
२५ ततः संस्थाप्य कलशं पात्रं चोपरि संस्थितं सहिरण्यं तु कलशं सप्तधान्येन संयुतं
२६ पात्रे कृत्वा ततो देव वामनं स्थापयेत्सुधीः भगवंस्त्वमुपरि स्थाप्य तिलांस्तत्रैव सन्निधौ
२७ वरो वरेण्यो वरदो वराहो धरणीधरः अपवित्रं पवित्रं मां करोति भगवान्हरिः २८॥ एम०
२

६

स्नानमंत्रः नमः [illegible] कमलनाभाय नमस्ते जलशायिने नमस्ते केशवानंद वासुदेव नमोस्तु
ते २९ कलशस्थापनमंत्रः कदलीगर्भसंभूता तिलकुसुमागसंभवा कुशास्ते त्वं प्रतिस्था
प्य वामनाय नमोस्तु ते ३० वामनप्रतिष्ठा प्रसीद देवदेवेश नमस्ते विश्वभावनः नमस्ते
दितिपुत्राय पीतनिर्मलवाससे चंदनमंत्रः ३१ पाटांगली पिशाचास्तेह स्तांगलीषु
स्थकाः चंद्रादित्यौ तु नयनौ द्यौ शिरः पूरितो मया ३२ धूपपुष्पदीपताम्बूलमंत्रः सश्री
कः श्रीधरगृहः श्रवणर्क्षयुतो मम अर्घ्यं गृहाण गोविंद द्वादश्या सहितो तनु ३३ अ
र्घ्यमंत्रः वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयं वामनस्तारको नित्यं तेन वै वामनेन मः
३४ दानमंत्रः विधानेन समभ्यर्च्य दत्वार्घ्यं नियतः शुचिः रात्रौ जागरणं कृत्वा सर्वपापैः प्र
मुच्यते ३५ एवं कृत्वा द्विजस्तत्र श्रीराम सवीक्ष्य सर्वरी प्रभाते तेन सहितो गृहमागात्सम
त्पकः ३६ दत्वा परिच्छदं सर्वं वैश्य वाय कुटुंबिने दधिभक्तयुतं तत्र द्विघान सकरकं न
व ३७ सोपि दापितः सर्वं दधिभक्तसमन्वितं करकं तेन मित्रेण मैत्रयुक्तेन कामतः

Indira Gandhi National
Centre for the Arts

३८ पश्चात्तत्पारणां कृत्वा वणिक्स बुभुजे ततः विश्रम्य च मुहूर्त्तं तु ततः स्वस्थानमुत्सुकः
३ ३९ ततः कतिपयाहोभिर्वणिकां चलमागतः तं निग्रोधं पुरा तेन बालभावे सुशोभनं
४० आरोपितं प्रयत्नेन सिंचितं पालितं द्विजा वृतः स बहुभिस्तत्र पिशाचैः कृष्णका
रके ४१ उद्यते चैव तत्स्थानं यत्र यत्राश्रयो चते तेषामध्ये समभवत्स राजा गुह्य
केश्वरः ४२ तत्र मध्यंगते भानौ देवकन्याः सुशोभनाः आनयन्करकं शुभ्रं जलपू
र्णं विटे द्विजाः ४३ दधिभक्तशरावेणा पिहितं सुमनोहरं भुंजते तेन सहिताः पि
शाचास्तत्र गुह्यका ४४ पश्चात्तावुभुजे राजा वेदन्नममृतोपमं तीर्थयात्राप्रसंगेन
स द्विजो मरुमंडले ४५ श्रांतो बुभुक्षितः प्राप्तो न्यग्रोधशाखिनां वरं यावत्तत्र प्रपश्य
सौ तत्र बहवस्तत्र विरूपकान् ४६ एकाक्ष्यापिंगनयनान्दीर्घतुंडान्भयानकान्
तान्दृष्ट्वा भयमापन्नो गर्भस्त्रि मुनिसत्तमं ४७ विलीनो मध्यगो गुल्मे न्यग्रोधस्य स
संभ्रमः अथ पश्यति चायांतं करकं दधिसंयुतं ४८ देवलोकाद्वरस्त्रीभिः सेवितं सुम रम ३

नोहरं आनीय च ततो भुक्त्वा तेभ्यस्तस्य समीपतः ४९ विभज्य प्रददौ तेषां गुह्यकानां गतो
स्तदा पश्चाच्च शब्दं चुक्रोश स आतिथ्यमिवोत्तमं ५० तस्मिंस्तु समये विप्रो मुक्ताल्मिः स
त्यधैर्यतः अथाहमतिथिः प्राप्तश्चिरकालं बुभुक्षितः ५१ पिशाचराजा स त्वारं तदन्न
ममृतोपमं भुजापितो द्विजवरो महत्या श्रद्धया किल ५२ पश्चात्पीतं सुगंधं च समानीयं ल४
५ख करके स्थितं विश्रांतो निर्भयो जातो स्वेहि वर्त्तते यथा ५३ भुक्तशेषं ततो भुक्तं ते नैव द्वि
जसत्तमाः कृते भुक्ते तदा यत्नं स्वस्थाने चागमस्तु नः ५४ देवकन्यार्थते याभ्यर्थान्स्वर्गलो
के तु रासरं सोपि तेनैव सहितः कथां चक्रे द्विजोत्तमः ५५ कस्मात्स्थानादिहायातः किं
मागमनकारणं कथयस्व द्विजश्रेष्ठ परं कौतूहलं हि मे ५६ ब्राह्मण उवाच तीर्थ
यात्राप्रसंगेन श्रांतोहं मरुमध्यतः सार्थभ्रष्टो न संदेहो ह्यायातस्तव चाश्रमं ५७ ग
भस्तिरिति विख्यातं नाम ते कथितं मया नामसंकीर्तनात्तत्र गुह्यको यातिनस्मरन्
ज१ ५८ उवाच तं द्विवरं पूर्वमित्रोसि मे स्मृतः पूर्वसंबद्धतोहं वै उपदेशात्त्वयानघ ५९

Indira Gandhi National
Centre for the Arts

श्रवणाद्वादशीयोगाद्व्रतस्यास्य प्रभावतः इदानीं वुगमिष्यामि प्रयागं तीर्थमुत्तमं ६०॥
समेता गुह्यकैर्भद्रैः स्त्वत्र साधुसमागमः यथा समुद्रस्य स्नानं तथा कुत्र न संशयः ६१
एतस्मिन्नन्तरे विप्राः सर्वे ते गुह्यका किल विप्रेण सहिताः प्राप्ताः प्रयागं पापनाशनं ६२
श्राद्धं कृतं तत्र दातेन सर्वेषां नाम गोत्रतः प्राप्ते सौदन संनिध्यं ते च सर्वे दिवं गताः ६३
द्वादश्यामुपवासोत्र त्रयोदश्यां नपापारणं निषिद्धमपि कर्तव्यमाज्ञेषा परमेष्ठिनः ६४
अर्घ्यप्रदानमहात्म्यं यः शृणोति नरः सुधीः कृत्वा प्रकुर्वते नूनं सर्वकामफलं लभेत्
६५ विजयाख्यमहापुण्यं नियतः समुपासयेत आदाय पुस्तकान् संप्रपित्तृणां मातृ
कास्तथा ६६ आत्मना सहितो दिव्यैर्विमानैः सर्वकामिकैः किंकराणां रवनिर्घोषैर्विष्णु
लोकं नयेन्नरः ६७ एतदेव व्रतं कृत्वा द्वादशद्वादशीफलं तयोस्तु संगमे भुक्ते द्वाद
शद्वादशीहरेत ६८ इति श्रीभविष्योत्तरे श्रवणद्वादशीव्रतं समाप्तं० शुभमस्तु०

समा०



Indira Gandhi National
Centre for the Arts